ज्वरांश्च निखिलान् हन्यान्नात्र कार्य्या विचारणा॥
पृथग्द्वन्द्वागन्तुजांश्च धातुस्थान् विषमांस्तथा।
सन्निपातोद्भवांश्चापि मानसानपि नाशयेत्॥
शीतादीनपि दाहादीन् मोहं तन्द्रां भ्रमं तृषाम्।
कासं श्वासञ्च पाण्डुञ्च हृद्रोगं कामलामपि॥
त्रिकपृष्ठकटीजानुपार्श्वशूलञ्च नाशयेत्।
शीताम्बुना पिबेदेतत् सर्व्वज्वरनिवृत्तये॥
सुदर्शनं यथा चक्रं दानवानां विनाशनम्।
तद्वज्ज्वराणां सर्व्वेषां चूर्णमेतत् प्रणाशनम्॥"
पुष्करमूलाभावे कुष्ठमपि दद्यात्। भार्ग्यभावे कण्टकारीमूलम्। सौराष्ट्राभावे स्फुटिकां दद्यात्। तगरालाभे कुष्ठं देयम्। जीवकर्षभकयोरलाभे विदारीकन्दस्य भागद्वयं दद्यात्। पुण्डरीकं श्वेतकमलम्। काकोल्यभावे अश्वगन्धामूलं दद्यात्। तालीशपत्रकाभावे स्वर्णतालो प्रदीयते। इति। अथवा कण्टकारीजटा देया। इति सुदर्शनचूर्णम्। *।
"शटी निशाद्वयं शुण्ठी दारु पुष्करमूलकम्।
एला गुडूची कटुका पर्पटञ्च सवासकः॥
भार्गी किराततिक्तञ्च दशमूलं तथैव च।
क्वाथमेषां पिबेत् कणासिन्धुचूर्णयुतं नरः॥
ज्वरान् सर्व्वान् द्रुतं हन्ति नात्र कार्य्या
विचारणा॥"
अनुभूतमत्युत्तममेतत्॥ *।
"हरीतकीत्रिवृद्दन्तीदारकर्षां पृथग्भवेत्।
पलद्वयं कणा शुण्ठी गुडूची गोक्षुरो वरी॥
सहदेवी विडङ्गञ्च प्रत्येकं पलसम्मितम्।
मधुना वटिकां कृत्वा खादेत् ज्वरमपोहति॥
कासं श्वासं मलस्तम्भं वह्निमान्द्यं नियच्छति॥
लाक्षा दशाक्षा अरुणा मरुत्वा
सचन्दनं लोहितचन्दनञ्च;
त्वक्पत्रकं वारि सुरा ससुस्ता
प्रत्येकमेतानि पलोन्मितानि॥
किराततिक्तस्त्रिवृतासतिक्ता-
म्लताकणापर्पटकण्टकार्य्यः।
विडङ्गविश्वामलकानि वाचा-
रसाग्निशाकारुणसिन्धुवाराः॥
एतानि देयानि पृथक् पलार्द्ध-
मानानि सर्व्वाणि च भेषजानि।
कल्कानमीषां विदधीत गव्य-
दुग्धेन वै सार्द्धतुलामितेन॥
तैलं तिलानान्तु तुलानुमानं
तेनैव कल्केन शनैः पचेत्तु।
हन्यात् ज्वरान् तैलमिदं समस्तान्
कुर्य्याद्बलं वीर्य्यमतीवपुष्टिम्॥
विमर्द्दनादाशु परिश्रमं श्रमं
शामं नयेत् संजनयेत् द्युतिं तनोः।
तथा यथामस्थिसमुद्भवामपि
प्रहृत्य निद्रां समुपार्ज्जयेत् सुखम्॥"
अरुणा मञ्जिष्ठा। वारि वाला। रसा रास्ना। इति लाक्षादितैलम्॥ *॥
"लाक्षारससमं तैलं तैलाम्मस्तु चतुर्गुणम्।
अश्वगन्धानिशादारुकौन्तीकुष्ठाब्दचन्दनैः॥
समूर्व्वारोहिणीरास्नाशताह्वामधुकैः समैः।
सिद्धं लाक्षादिकं नाम तैलमभ्यञ्जनादिना॥
सर्व्वज्वरक्षयोन्मादश्वासापस्मारवातनुत्।
यक्षराक्षसभूतघ्नं गर्भिणीनाञ्च शस्यते॥"
मस्तु दधिजलम्। कौन्ती रेणुका। चन्दनमत्र श्वेतमेव न तु रक्तम्। रोहिणी कटुकी। इति च लाक्षादितैलम्॥ *॥
"लाक्षा हरिद्रा मञ्जिष्ठा फेनिलं मधुकं बला।
लामज्जकं चन्दनञ्च चम्पकं नीलमुत्पलम्॥
प्रत्येकमेषां षण्मुष्टीः पक्त्वा तोये चतुर्गुणे।
चतुर्भागावशेषे तु गर्भे चैतत् समापयेत्॥
रेणुका पद्मकञ्चैव वाजिगन्धा तथैव च।
वेतसं चोरकं कुष्ठं देवदारु नखं त्वचम्॥
शतपुष्पा पुण्डरीकं मांसी मधुकमेव च।
एभिरक्षमितैः कल्कैः कषायेणैव पेषितैः॥
मस्तुशुक्तारनालानामाढ़काढ़कमावपेत्।
क्षीराढ़कसमायुक्तं तैलप्रस्थं विपाचयेत्॥
अभ्यङ्गात्तैलमेतद्धि शीघ्रं दाहमपोहति।
अपोहति तथा वातं पित्तं श्लेष्मभवं ज्वरम्॥
सप्रलापं सतृष्णञ्च तालुशोषभ्रमान्वितम्।
ग्रहोपसृष्टा ये बाला रक्षःसंदूषिताश्च ये॥
तेषां कष्टं प्रशमयेत्तैलं लाक्षादिकं महत्॥"
फेनिलं बदरम्। लामज्जकमुशीरवत् पीतच्छविक्षुपविशेषः।
लामज्जकं यदा न स्यादुशीरं दीयते तदा।
चम्पकमित्यस्य स्थाने कुत्रापि गैरिकं इति पाठः।
नीलोत्पलस्यालाभे तु कुमुदं देयमिष्यते।
समापयेत् प्रक्षिपेदित्यर्थः। चोरकं ग्रन्थिपर्णस्य भेदः भटिउडर इति नेपालदेशे भवति। तदलाभे ग्रन्थिपर्णं देयम्। पुण्डरीकं श्वेतकमलम्। मस्तु दधिजलम्। शुक्तं सन्धानभेदः। आरनालमपि सन्धानभेदः। इति महालाक्षादितैलम्॥ *॥ अथ नवज्वरे रसाः।
"सूतो गन्धटङ्कणः शोधिताश्च
सर्व्वैस्तुल्या शर्करा मत्स्यपित्तैः।
भूयो भूयो मर्द्दयेत्तं त्रिरात्रं
वल्लो देयः शृङ्गवेरद्रवेण॥
तापे शीतं वीजनैस्तक्रभक्तं
वृन्ताकाद्यं पथ्यमेतत् प्रदिष्टम्।
अद्रौ चोग्रं हन्ति सद्यो ज्वरन्तु
पित्ताधिक्ये मूर्द्ध्नि तोयञ्च दद्यात्॥"
अस्य प्रक्रिया। पाराशुद्ध भाग १ गन्धकशुद्ध भाग १ सोहागाभ्रष्ट भाग १ मरिच भाग १ शर्करा भाग ४ रोहूमत्स्यकपित्त भाग ३। अमुं प्रतिदिनं सर्व्वं दिनत्रयं मर्द्दयेत्। रसमिमं रक्तित्रयमितमार्द्रकरसेन दद्यात्। ओदनं तक्रं वृन्ताकफलं भोक्तुं दद्यात्। व्यजनादैः शीतलमुपचारं कुर्य्यात्। उदकमञ्जरीरसो नवज्वरेषु॥ *॥ रसरत्नप्रदीपे।
"दद्यात् समं सूतसमुद्रफेन
हिङ्गूलगन्धं परिमर्द्य यामम्।
नवज्वरे वल्लयुगं त्रिघस-
मार्द्राम्भसायं ज्वरधूमकेतुः॥"
प्रक्रिया। पाराशुद्धगन्धकशुद्धहिङ्गुलशुद्धसमुद्रफेनसभागं सर्व्वं याममेकमार्द्रकरसेन संमर्द्य रक्तिकाषट्कमितमार्द्रकरसेन दिनत्रयं नवज्वरी भक्षयेत्। दिनत्रयान्नवज्वरो नश्येत्। इति ज्वरधूमकेतुः॥ *॥ रसेन्द्रचिन्तामणौ।
"शुद्धः सूतो विषो गन्धः प्रत्येकं शाणसंमितः।
धूर्त्तबीजं त्रिशाणं स्यात् सर्व्वेभ्यो द्विगुणा
भवेत्॥
हेमाह्वा कारयेदेषां चूर्णं सूक्ष्मं प्रयत्नतः।
जम्बीरजीरकैर्द्दयच्चूर्णं गुञ्जाद्वयोन्मितम्॥
आर्द्रकस्य रसेनापि ज्वरं हन्ति त्रिदोषजम्।
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम्॥
विषमञ्च ज्वरं हन्यान्नवं जीर्णञ्च सर्व्वथा।
महाज्वराङ्कुशो नाम्ना रसोऽयं सर्व्वसंमतः॥"
प्रक्रिया। शुद्धपारा शुद्धगन्धक शुद्धविष प्रत्येकं टङ्क १ धत्तूरबीज टङ्क ३ चोकटङ्क १२ सर्व्वेषां चूर्णमतिसूक्ष्मं कर्त्तव्यम्। इति महाज्वराङ्कुशः॥ *॥ सर्व्वज्वरेषु शार्ङ्गधरे।
"एको भागो रसात् शुद्धात्त्रैवेयः पिप्पली शिवा।
आकारकरभो गन्धः कटुतैलेन शोधितः॥
फलानि चेन्द्रवारुण्याश्चतुर्भागमिता अमी।
एकत्र मर्द्दयेच्चूर्णमिन्द्रवारुणिकारसैः॥
माषोन्मितां वटीं कृत्वा दद्यात् सद्योज्वरे बुधः।
छिन्नारसानुपानेन ज्वरघ्नी वटिका मता॥"
शैवेयः छड़ इति लोके। शिवात्र हरीतकी। आकारकरभः अकरकरहा इति लोके। चतुर्भागमिता अमी शैवेयादयः षट् समुदिता भागचतुष्टयमिताः। इति ज्वरघ्नीवटिका॥ *॥ शार्ङ्गधरे।
"रसं गन्धञ्च दरदं जैपालं क्रमवर्द्धितम्।
दन्तीरसेन संपिष्य वटी गुञ्जामिता कृता॥
प्रभाते सितया सार्द्धमसिता शीतवारिणा।
एकेन दिवसेनैषा नवज्वरहरी भवेत्॥"
इति च ज्वरघ्नीवटिका॥ *॥ रसरत्नप्रदीपे।
"रसो गन्धो विषं शुण्ठी पिप्पली मरिचानि च।
पथ्या विभीतकं धात्री दन्तीबीजञ्च शोधितम्॥
चूर्णमेषां समांशानां द्रोणपुष्पीरसैः पुटेत्।
वटीं माषनिभां कुर्य्यात् भक्षयेन्नूतने ज्वरे॥"
इति नवज्वरेभहरीवटी। इति नवज्वरे रसाः॥ *॥
अथ सामान्यज्वरे रसाः।
"शुद्धं सूतं विषं गन्धं धूर्त्तबीजं त्रिभिः समम्।
चतुर्णां द्विगुणं व्योषं चूर्णं गुञ्जाद्वयोन्मितम्॥
आर्द्रकस्य रसैः किंवा जम्बीरस्य रसैर्युतम्।
महाज्वराङ्कुशो नाम्ना सर्व्वज्वरविनाशनः॥
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम्।
विषमं वा त्रिदोषं वा ज्वरं हन्ति न संशयः॥"
प्रक्रिया। शुद्धपाराटङ्क १ शुद्धविषटङ्क १ शुद्धगन्धकटङ्क १ धत्तूरबीजटङ्क ३ शोठिटङ्क ४ पीपरीटङ्क ६ मरिचटङ्क ३ सर्व्वेषां चूर्णमतिसूक्ष्मं कर्त्तव्यम्। इति महाज्वराङ्कुशः॥ *॥